# केरलपाठावलिः
# संस्कृतम्

## अष्टमी कक्ष्या

अक्कादमिक-संस्कृतविद्यालयानां कृते

# KERALA READER - SANSKRIT

## Standard VIII

**For Academic and Sanskrit Schools**

**GOVERNMENT OF KERALA**
**Department of Education**
**2009**

## राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारत भाग्यविधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड़ उत्कल बंगा।
विंध्य हिमाचल यमुना गंगा,
उच्छलजलधि तरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव जय गाथा।
जनगण मंगलदायक जय हे,
भारत भाग्यविधाता।
जय हे जय हे जय हे
जय जय जय जय हे।

***Prepared by*** :
State Council of Educational
Research and Training (SCERT)
Poojappura, Thiruvananthapuram - 12, Kerala.
*Website* www.scertkerala.gov.in
*e-mail* scertkerala@asianetindia.com

© Government of Kerala • Department of Education • 2009

# भूमिका।

सर्वैः विदितमेवेदं सत्यं यत् पाठपुस्तकपरिष्करणप्रवृत्तिः अनुस्यूतं प्रचलिता वर्तते इति। गतवर्षे पञ्चम्याः तथा सप्तम्याश्च कक्ष्ययोः पाठ्यपुस्तके परिष्कृते। अस्मिन् वर्षे षष्ठ्याः, अष्टम्याः च कक्ष्ययोः पाठ्यपुस्तकपरिष्करणं कृतम्।

पञ्चम्याः कक्ष्यायाः पाठ्यक्रमम् अनुसृत्यैव तदुपरिस्थानां कक्ष्याणां पाठ्यपद्धतिः आसूत्रणीया। एकैकस्याः अपि कक्ष्यायाः विज्ञानस्तरस्य अनुयोज्यं हि पाठ्यपुस्तकनवीकरणं सम्पद्यते। तदात्वे एव तस्य सफलता भविष्यति।

प्रथमं पाठ्यभागः, ततः किं करणीयमिति शीर्षके पठनप्रवर्तनानि, अधिकविस्तरः, अनुबन्धः च आयोजितः। किमधिगतम्? इति स्वीयमूल्यनिर्णयपत्रिका अपि आयोजिता वर्तते। एकैकस्यापि एककस्य आमुखम् अध्यापकैरवधारणीयम्। शब्दकोशः, सिद्धरूपाणि, व्याकरणविशेषाः, प्रयोगविशेषाः इत्यादयः एकैकस्मिन्नेकके सन्ति।

एस्.सि.ई.आर्.टी संस्थायाः नेतृत्वे संघटितासु कर्मशालासु एव इमानि पुस्तकानि रचितानि। परिचयसम्पन्नानां विदुषां, महाविद्यालयाध्यापकानाम्, उच्चविद्यालयाध्यापकानां, जिल्लास्तरीयाध्यापकप्रशिक्षणकेन्द्रीयाणाम् अध्यापकानां परिचयप्राचुर्यमेव एषां पुस्तकानां निर्माणविजये कारणम्।

नवीकृतपाठ्यरीतीः स्वीकृत्य विद्यालयेषु पठनप्रवर्तनम् आसूत्रयितुं प्रवृत्तिपथमानेतुं च अध्यापकाः प्रयत्नं कुर्युः विद्यार्थिनः फलभागिनश्च भवेयुः इति आशास्ये।

भवदीयः

**प्रोफ. एम्.ए. खादर्**

अनन्तपुरी — निदेशकः

5.1.2009 — राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः।

# Textbook Development

**Kerala Reader, Standard VIII - Sanskrit**

**Workshop participants**

Smt.Girija.T

Sri. Krishnakumar. T.K

Sri. Madhavan Pillai.V

Dr. Mohandas. K

Sri. Pasupathinathan. P.A

Sri. Rajeevan. M

Smt. Ramabai. K.G

Sri. Ramachandran.N.K

Dr. Suneethi Devi.T.D

Sri. Thilakarajan. T

Sri. Vijayan.K.R

Sri. Vijayan.V

Dr. Vivekanandan. S.S

**Artists**

Sri. Balakrishnan Achary. P.G

Sri. Rajeevan Parayil

Sri. Varghese Kalathil

**Experts**

Dr.Narayanan Namboodiri.P.

Prof. R. Vasudevan Potti

Sri.Sreekantan Nair.D

**Academic Co-Ordinator**

Dr. T. Kerala Sreemathi

**State Council of Educational Research and Training (SCERT)**

Vidyabhavan, Poojappura, Thiruvananthapuram - 695 012

# विषयानुक्रमणिका।


| क्रमसंख्या | | एककस्य/ पाठस्य नाम | पुटसंख्या |
|---|---|---|---|
| **एककम् - I** | | **आपोमयः प्राणः।** | 7-18 |
| | १. | जीवहेतुः (उपन्यासः) | 8 |
| | २. | तदा वृष्टिरजायत (कथा) | 11 |
| **एककम् - II** | | **आरोग्यं सर्वसाधनम्।** | 19 - 34 |
| | ३. | लोकहिताय (उपन्यासः) | 20 |
| | ४. | तस्माद् व्यायाममाचरेत् (सुभाषितानि) | 25 |
| **एककम् - III** | | **जगदेतत् प्रकाशते।** | 35 - 50 |
| | ५. | लोकशङ्करः (जीवनचरितम्) | 36 |
| | ६. | भारतं महीयते (गानम्) | 44 |
| **एककम् - IV** | | **कर्मैव समाराधना।** | 51 - 65 |
| | ७. | न निश्चितार्थाद् विरमन्ति धीराः (कथा) | 52 |
| | ८. | उद्योगी लभते श्रियम् (गीतम्) | 58 |
| **एककम् - V** | | **संस्कृतिः।** | 67 -92 |
| | ९. | रन्तिदेवस्य कीर्तिः (कथा) | 68 |
| | १०. | पृथिव्याः मानदण्डः (काव्यम्) | 72 |
| | ११. | कौरवसभायां पाण्डवदूतः (नाटकम्) | 81 |
| | १२. | वृथा बुधाः भ्रमन्ति (प्रहेलिकाः) | 87 |
| **एककम् - VI** | | **दैवायत्तं कुले जन्म।** | 93 - 104 |
| | १३. | मदायत्तं तु पौरुषम् (कथा) | 94 |
| | १४. | मदौद्धत्यम् (गानम्) | 98 |

# एककम् - १



# आपोमयः प्राणः ।

मानवजीवने जलमत्यन्तमपेक्षितम्। तस्य प्राधान्यप्रतिपादकः उपन्यासः तथा जलदौर्लभ्येन क्लिश्यतः जनसमूहस्य कथा च एककेऽस्मिन् आयोजितौ।

# १. जीवहेतुः



पञ्चभूतात्मकः खल्वयं प्रपञ्चः। पृथिव्यप्तेजोवाय्वाकाशानि पञ्चभूतानि। अस्मिन् जगति ये ये पदार्थाः सन्ति सर्व एव ते पञ्चभूतात्मकाः भवन्ति। एवं

मानुषं शरीरमपि पञ्चभूतात्मकं खलु। अतः तत् पाञ्चभौतिकम् इत्युच्यते। पञ्चभूतेषु जलम् अस्माकं जीवनं सर्वसम्पन्नं करोति। “अप एव ससर्जादौ” इति स्मृत्या जलस्यैव प्रथमा सृष्टिः इत्यवगम्यते। “आपोमयः प्राणः” इत्युपनिषद्वाक्यं प्रसिद्धम्। अनेन प्राणस्य जलमयत्वम् उच्यते। जीवस्योत्पत्तिः जल एव भवति इति सुविदितम्। एवं प्राणस्य स्थितिरपि जलमाश्रित्यैव। अत एव पूर्विकैः जलस्य देवतात्वं परिकल्प्य आराधितवन्तः।

विविधैः जलाशयैः सम्पन्नः भवति केरलदेशः। जीवजालानां भूमण्डलस्य च सुस्थितये जलं विमलं परिरक्षणीयम्। एतस्य संरक्षणं कथं कर्तुं शक्नुमः इति चिन्ता आवश्यकी। मलिनीकरणनिवारणद्वारा, जलाशयानां संरक्षणेन, शास्त्रीयजलसंभरणोपायेन ,शुद्धजलस्य मितोपभोगेन च जलं परिपालयेम।

भूमेः, जलस्य, तेजसः, वायोः, आकाशस्य च परस्पराश्रयत्वेनैव प्रपञ्चस्य सुस्थितिः। जलस्य संरक्षणेनैव भूतानां संरक्षणं कर्तुं शक्ताः भवेम। ऋग्वेदीयं मधुसूक्तं अनुस्मरामः -

**मधुवाता ऋतायते**<br>
**मधु क्षरन्ति सिन्धवः**<br>
**माध्वीर्नः सन्त्वोषधीः।।**

(वाताः वायवः,मधु मधुरं (सुखकरं) ऋतायते वान्तु। सिन्धवः नद्यः, मधुरं स्वादु (जलं) क्षरन्ति - प्रवहन्तु। ओषधीः शाल्यादयःउद्भिदः, नः अस्मभ्यं,माध्वीः मधुराः (रसवत्यः) सन्तु - भवन्तु।)

**पदच्छेदः।**

| | | |
|---|---|---|
| अप एव | - | अपः + एव |
| इत्युच्यते | - | इति + उच्यते |
| इत्यवगम्यते | - | इति + अवगम्यते |
| इत्युपनिषद्वाक्यं | - | इति + उपनिषद्वाक्यं |
| एककेऽस्मिन् | - | एकके + अस्मिन् |
| खल्वयं | - | खलु + अयं |

| | | |
|---|---|---|
| जल एव | - | जले + एव |
| जलमाश्रित्यैव | - | जलम् + आश्रित्य + एव |
| जीवस्योत्पत्तिः | - | जीवस्य + उत्पत्तिः |
| परस्पराश्रयत्वेनैव | - | परस्पराश्रयत्वेन + एव |
| माध्वीर्नः | - | माध्वीः + नः |
| सर्व एव | - | सर्वे + एव |
| ससर्जादौ | - | ससर्ज + आदौ |
| संरक्षणेनैव | - | संरक्षणेन + एव |
| सन्त्वोषधीः | - | सन्तु + ओषधीः |
| स्थितिरपि | - | स्थितिः + अपि |

## किं करणीयम् ?

❖ जलस्य मितोपयोगः कार्यः - कथम्? चर्चां प्रचालयतु। टिप्पणीं च लिखतु।

**श्रद्धेयाः अंशाः।**

- विषयावबोधः।
- आशयस्पष्टता
- उचितभाषाप्रयोगः।

❖ जलस्य संरक्षणेन भूतानां संरक्षणं शक्यम्। चर्चां करोतु। टिप्पणीं च लिखतु।

**श्रद्धेयाः अंशाः।**

- विषयावबोधः।
- उचितभाषाप्रयोगः।
- आशयव्यक्तता।

❖ विद्यालये वृष्टिजलसम्भरण्याः स्थापनाय प्रथमाध्यापकम् अभ्यर्थयन् निवेदनं समर्पयतु।

**श्रद्धेयाः अंशाः।**

- निवेदनस्य घटना।
- उचितभाषाप्रयोगः।
- आशयव्यक्तता।

# २. तदा वृष्टिरजायत ।

पुरा अङ्गेषु अतिबलवान् प्रथितयशाः राजा लोमपादः प्रजाः सम्यक् पालयति स्म। गच्छता कालेन राज्ये बहवोऽनर्थाः बभूवुः। अन्तरिक्षेऽपि प्रतिकूलानि परिवर्तनानि अजायन्त। तत्र वर्षाणि यावत् महती अनावृष्टिः अभवत्। नदीभिः अन्यैः जलाशयैश्च सम्पुष्टे तस्मिन् देशे जनाः जलसंभरणं नैवाचिन्तयन्। चिरं वृष्ट्यभावात् बिन्दुमात्रमपि जलमानेतुं ते महान्तं क्लेशमनुभूतवन्तः। जलदौर्लभ्यात् मनुष्याः, पक्षिमृगादयः, वृक्षलतादयश्च दयनीयामवस्थां प्रापुः।

स्वराज्ये अनुभूयमाना दुर्दशेयं कथं परिहरणीया इति राजा आप्तैः, पुरोहितैः,अमात्यैः च सहामन्त्रयत्। ते अनावृष्ट्याः परिहारमन्विष्य एवमवदन्- "भो राजन् विभाण्डकमहर्षेः पुत्रस्य ऋश्यशृङ्गस्य पादस्पर्शेनैव अस्माकं देशे वृष्टिः लभ्येत। तस्मिन् तादृशी काप्यलौकिकी सिद्धिरस्तीति श्रूयते। तदर्थं यतामहै" इति। एतच्छ्रुत्वा राजा मुनिकुमारमङ्गानानेतुं निरचिनोत्। तस्मिन् कर्मणि काश्चन सुन्दरीः युवतीः नियोजयामास।

विभाण्डकस्याश्रमः घोरारण्ये आसीत्। ऋषिपुत्रः स्वजनकात् आश्रमाच्च ऋते नान्यत्किमपि अजानात्। यदा प्रमदाः सुन्दर्यः आश्रमं प्राप्ताः तदा विभाण्डकः तत्र नासीत्। कुमारं ऋश्यशृङ्गं विकर्तुं ताः मधुरमगायन् अनृत्यंश्च।



इदंप्रथमतया विचित्ररूपाः ताः विलोक्य नार्यनभिज्ञः ऋश्यशृङ्गः विस्मितोऽभवत्। तथापि सः ताः स्वाश्रमं नीत्वा अतिथिपूजां कृतवांश्च। चिरेण नार्यः मुनिकुमारं प्रलोभ्य तमङ्गराज्यमानयन्। यदा सः अङ्गराज्यं प्राविशत् तदा वृष्टिरजायत।

**पदच्छेदः।**

| | | |
|---|---|---|
| अनृत्यंश्च | - | अनृत्यन् + च |
| आश्रमाच्च | - | आश्रमात् + च |
| एतच्छ्रुत्वा | - | एतत् + श्रुत्वा |
| एवमवदन् | - | एवम् + अवदन् |
| काप्यलौकिकी | - | कापि + अलौकिकी |
| क्लेशमनुभूतवन्तः | - | क्लेशम् + अनुभूतवन्तः |
| कृतवांश्च | - | कृतवान् + च |
| जलाशयैश्च | - | जलाशयैः + च |
| तथापि | - | तथा + अपि |
| तमङ्गराज्यमानयन् | - | तम् + अङ्गराज्यम् + आनयन् |
| दुर्दशेयम् | - | दुर्दशा + इयं |
| नैवाचिन्तयत् | - | न + एव + अचिन्तयत् |
| परिहारमन्विष्य | - | परिहारम् + अन्विष्य |
| पादस्पर्शेनैव | - | पादस्पर्शेन + एव |
| बहवोऽनर्थाः | - | बहवः + अनर्थाः |
| बिन्दुमात्रमपि | - | बिन्दुमात्रम् + अपि |

| | | |
|---|---|---|
| मधुरमगायन् | - | मधुरम् + अगायन् |
| विस्मितोऽभवत् | - | विस्मितः + अभवत् |
| वृक्षलतादयश्च | - | वृक्षलतादयः + च |
| वृष्टिरजायत | - | वृष्टिः + अजायत |
| सहामन्त्रयत् | - | सह + अमन्त्रयत् |
| सिद्धिरस्तीति | - | सिद्धिः + अस्ति + इति |

## किं करणीयम् ?

❖ आश्रमं प्राप्तानां सुन्दरीणाम् ऋश्यऋङ्गस्य च मिथः भाषणं सम्भाव्य लिखतु। वर्गे अवतारयतु।

**श्रद्धेयाः अंशाः।**

- उचितभाषाप्रयोगः।
- भावना।
- औचित्यम्।

❖ अनावृष्टेः दोषान् तत्परिहारोपायान् च अधिकृत्य चर्चां करोतु। टिप्पणीं च लिखतु।

**श्रद्धेयाः अंशाः।**

- उचितभाषाप्रयोगः।
- विषयावबोधः।

❖ पाठ्यांशे प्रदत्तानि संश्लिष्टपदानि चित्वा पदच्छेदं लिखतु। ततः तत्समानानि संश्लिष्टपदानि द्वित्राणि सञ्चित्य पट्टिकां रचयतु।

### श्रद्धेयाः अंशाः।

- पाठ्यांशस्थानि सर्वाणि संश्लिष्टपदानि स्वीकरणीयानि।
- तत्समानानि अन्यानि पदानि पाठान्तरेभ्यः चेतव्यानि।
- समानानि पदानि पट्टिकारूपेण क्रमीकरणीयानि।

उदा अनृत्यंश्च - अनृत्यन् + च

कृतवांश्च - कृतवान् + च

रचितवांश्च - रचितवान् + च

गतवांश्च - गतवान् + च

## अनुबन्धः।

### शब्दकोशः।

| | | | |
|---|---|---|---|
| अवगम्यते | ज्ञायते | അറിയപ്പെടുന്നു | is known |
| आपः | जलानि | ജലം | water |
| तेजः | अग्निः | പ്രകാശം | fire/one of the five elements |
| दुर्दशा | कष्टकालः | കഷ്ടകാലം | time of calamity |
| पुरोहितः | पुरोधाः | പുരോഹിതൻ | priest |
| पूतम् | निर्मलम् | പരിശുദ്ധം | pure |
| पृथिवी | भूमिः | ഭൂമി | earth |
| प्रथितः | प्रसिद्धः | പ്രസിദ്ധൻ | famous |

| | | | |
|---|---|---|---|
| प्रलोभः | मोहः | വശീകരണം | attraction |
| विकर्तुं | विकारयुक्तं कर्तुं | വികാരനിർഭരനാക്കാൻ | make passionate |
| विमलं | निर्मलं | പരിശുദ്ധം | pure |
| विस्मितः | आश्चर्यभरितः | ആശ്ചര്യഭരിതൻ | excited man |
| वृष्टिः | वर्षम् | മഴ | rain |
| ससर्ज | सृजति स्म | സൃഷ്ടിച്ചു | created |
| सिद्धिः | शक्तिः | ശക്തി | strength |
| स्थितिः | अवस्थितिः | നിലനിൽപ് | existence |

## अमरकोशः

जलं    आपःस्त्री भूम्नि वार्वारि सलिलं कमलं जलम्।

पृथिवी  गोत्राकुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही।

## अव्ययपरिचयः।

यदा - तदा    यदा सूर्यः उदयते तदा कमलानि विकसन्ति।

## व्याकरणविशेषः।

पालयति स्म - स्मयोगे लट् भूतार्थवाची।

यथा - दशरथः प्रजाः पालयति स्म।

आश्रमात् ऋते - ऋते शब्दयोगे पञ्चमी विभक्तिः।

यथा - नलात् ऋते दमयन्ती अन्यं न वरिष्यति।

वर्षाणि यावत् - 'यावत्' शब्दयोगे द्वितीया।

यथा - पार्वती वर्षाणि यावत् तपश्चकार।

## शब्दरूपाणि।

**प कारान्तः स्त्रीलिङ्गः नित्यं बहुवचनान्तः अप् शब्दः।**

| | |
|---|---|
| प्रथमा | आपः |
| सं.प्रथमा | हे आपः |
| द्वितीया | अपः |
| तृतीया | अद्भिः |
| चतुर्थी | अद्भ्यः |
| पञ्चमी | अद्भ्यः |
| षष्ठी | अपाम् |
| सप्तमी | अप्सु। |

## धातुरूपाणि

ससर्ज - सृज् विसर्गे लिट् प.प.प्र. पु.ए.व.

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | ससर्ज | ससृजतुः | ससृजुः |
| मध्यमपुरुषः | ससर्जिथ | ससृजथुः | ससर्ज |
| उत्तम पुरुषः | ससर्ज | ससृजिव | ससृजिम। |

**भू सत्तायां लिङ् प.प.प्र.पु.ए.व.**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | भवेत् | भवेतां | भवेयुः |
| मध्यमपुरुषः | भवेः | भवेतं | भवेत |
| उत्तम पुरुषः | भवेयं | भवेव | भवेम । |



# किमधिगतम् ?

| **जलस्य मितोपयोगः - चर्चा** | स्वयं साधु कृतम् | सुहृदः साहाय्येन कृतम् | परिष्करणीयं वर्तते |
|---|---|---|---|
| पाठ्यांशस्य आशयः स्वीकृतः | | | |
| उचिताः उपायाः निर्दिष्टाः | | | |
| आशयव्यक्ततया अवतारितम् | | | |
| इतरेषाम् आशयाः स्वीकृताः | | | |

**संश्लिष्टपदचयनम् ।**

| | | | |
|---|---|---|---|
| संश्लिष्टपदानि सर्वाणि चितानि | | | |
| उदाहरणान्तराणि लिखितानि | | | |
| समानानि पदानि पट्टिकायां निवेशितानि | | | |

**संभाषणरचना।**

| | | | |
|---|---|---|---|
| पाठ्यांशस्य आशयः स्वीकृतः | | | |
| कथापात्राणां निर्णयः कृतः | | | |
| संभाषणस्य औचित्यम् | | | |
| स्वभावनायाः योजना | | | |